# Shriramadurga Stotram 2

# श्रीरामदुर्गस्तोत्रम् २

## Document Information

Text title : shrIrAmadurgastotram 2

File name : shrIrAmadurgastotram2.itx

Category : raama, kavacha, durga

Location : doc_raama

Author : Traditional

Proofread by : NA

Latest update : December 29, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 29, 2023

*sanskritdocuments.org*

# श्रीरामदुर्गस्तोत्रम् २

ॐ अस्य श्रीरामदुर्गस्तोत्रमन्त्रस्य विश्वामित्र ऋषिः,
अनुष्टुप्छन्दः, श्रीरामोदेवता, रां बीजं, नमः शक्तिः,
रामाय कीलकं, श्री सीताराम प्रीत्यर्थे पाठे विनियोगः ॥

अथ ऋष्यादि न्यासः ।
ॐ विश्वमित्रऋषये नमः शिरसि । अनुष्टुप्छन्दसे नमः मुखे ।
श्रीरामो देवतायै नमः हृदि । रां बीजाय नमः गुह्ये ।
नमः शक्तये नमः पादयोः । रामायेति कीलकाय नमः नाभौ ।
ॐ हुं फट् स्वाहा इति दिग्बन्धः ॥

अथ करन्यासः ।
रां अङ्गुष्ठाभ्यां नमः । रां तर्जनीभ्यां नमः ।
मां मध्यमाभ्यां नमः । यं अनामिकाभ्यां नमः ।
नं कनिष्ठिकाभ्यां नमः । मः करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादि न्यासः ।
रां हृदयाय नमः । रां शिरसे स्वाहा । मां शिखायै वषट् ।
यं कवचाय हुं । नं नेत्राभ्यां वौषट् । मः अस्त्राय फट् ।
श्रीरामदुर्गं पठेद् भक्त्या सर्वोपद्रव नाशनम् ॥

ॐ श्रीरामो रक्षेन्मां प्राच्यां रक्षेद्याम्यातु लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुमर्दनः ॥ १॥

ऐशान्यां जानकी रक्षेदाग्नेयां रविनन्दनः ।
बिभीषणस्तु नैरृत्यां वायव्यां वायुनन्दनः ॥ २॥

ऊर्ध्वं रक्षेन्महाविष्णुर्मध्यं पातु नृकेशरी ।
अधस्तु वामनः पातु सर्वतः पातु केशवः ॥ ३॥

सर्वदा कपिसेनाद्याः सर्वमर्कटनायकाः ।

चतुर्द्वारं सदा रक्षेच्चतुर्भिः कपिपुङ्गवैः ॥ ४॥

श्रीरामाख्यं महादुर्गं विश्वामित्रकृतं शुभम् ।
यः स्मरेद् भयकाले तु सर्वशत्रुविनाशनम् ॥ ५॥ (यः पठेद्)

रामदुर्गं पठेद्भक्त्या सर्वोपद्रवनाशनम् ।
सर्वसम्पद्प्रदं नृणां स गच्छेद्वैष्णवं पदम् ॥ ६॥ (सर्व सम्पत्करं)

इति श्रीरामदुर्गस्तोत्रं सम्पूर्णम् ॥

*Shriramadurga Stotram 2*

pdf was typeset on December 29, 2023

Please send corrections to *sanskrit@cheerful.com*